राँचीविश्वविद्यालयस्य पी-एच० डी० (संस्कृतम्)

उपाधिप्राप्तये प्रस्तावितं शोधप्रारूपम्

(मानविकी संकायः)

स्नातकोत्तर-संस्कृतविभागः राँचीविश्वविद्यालयः, राँची

"बुद्धचरितमहाकाव्ये बौद्धदर्शनस्य प्रभावः – एकं समीक्षात्मकमध्ययनम्"

शोधनिर्देशिका

शोधार्थी

डा0 कंचन कुमारी
सहायक प्राध्यापिका
संस्कृत विभाग
कार्तिक उराँव महाविद्यालय,
गुमला

चन्द्ररेखा माहात

शोधस्य आवश्यकताः -

सर्वेषां शास्त्रानां मूलभुतः दर्शनशास्त्रः । दर्शनशास्त्रस्य प्रभावः सर्वेषु शास्त्रेषु अभवत् । अतः काव्यचिन्तने दर्शनस्य प्रभावः अस्ति । कवि अश्वघोषऽपि तस्मिन् विषये ब्यतिक्रमं नास्ति । सः ततकालीनसामाजिकप्रेक्षापटेबुद्धजीवनसम्बन्धितम् दार्शनिकविचाराः काव्यविवेचने परिणतम् अभवत् । बुद्धचरितमहाकाव्यविषये तथा बौद्धदर्शनविषये पृथक पृथक चर्चां विभिन्नगवेषकैःकृतवन्तः ।परन्तु उभयोः दार्शनिकतत्त्वस्य तुलनात्मकमध्यनम् न दृश्यते । यथामति पुर्वकृतां गवेषणामूलकग्रन्थानां दृष्ट्वा पर्यालोच्य च वर्तमानशोधपत्रे उभयशास्त्रयोः दार्शनिकतत्त्वं प्रदर्शितम् भविष्यति ।

प्रस्तावनाः -

इह खलु विरञ्चि प्रपञ्चे समेषां प्राणिनां परमसुखावाप्तिपूर्वकात्यन्तिकदुःखनिवृत्यर्थं स्वभावतः एव निरन्तरं, विद्यते प्रयत्नः परन्तु एताएतदृशानन्दप्राप्तेः कः श्रेष्ठ उपायः इत्येवम् अज्ञायमानाः जनाः यस्मिन् कस्मिंञ्चित्साधने प्रवर्तमानाः दःखसाधने एव प्रवर्तन्ते , आपातरमणीयतया दुःखसाधने अपि सुखत्वभ्रान्त्या दुःखमहोदधौ निमज्यन्ति । एतादृशान् दुःखसागरे निमग्नान् भ्रमतः जनान् दृष्ट्वा तेषामुद्धारार्थं कृपालवः शास्त्रकाराः दर्शनशास्त्राणि न्यरुपयन् ।

दर्शनत्वं नाम तत्त्वविषकबोधसाधकत्वम् , तथा हि दर्शनशब्दस्य व्युत्पत्तिः 'दृश्यतेऽनेन इति दर्शनम्' । दृशिर् प्रेक्षणे इत्यस्माद् धातोः करणे ल्युट् प्रत्ययः शास्त्रम् हि "एकप्रयोजोपनिबद्धमशेषार्थप्रतिपादकम्" तथा हि एकदमै प्रयोजनाय मोक्षादिरुपकलाय उपनिबद्धम् निर्मितम् तादृशफलोपयोग्यशेषार्थज्ञापकं यत् तत् शास्त्रम् ।

भावसमृद्धं रसात्मकं काव्यम्। साधारणतः काव्यं निर्दिशति अस्माकं मनसः सुप्तानां भाबनानांप्रकाशकरणाय माध्यमम्अस्ति । साहित्यदर्पनकारःविश्वनाथः काव्यस्य लक्षणम् क्रियते–

"वाक्यं रसात्मकं काव्यम्"

अर्थात् रसैव काव्यस्य जीवनम् । रसं विनाकाव्यं कदापि काव्यरुपेन न गण्यते । वाल्मीकिमनन्तरम्प्रथितयशा महाकवि रुपेन यः संस्कृतसाहित्यं समादृतम् अकरोत् सैव महाकवि अश्वघोषःइति । सौन्दरनन्दमहाकाव्ये अन्तिमसर्गे कवेः अश्वघोषस्य परिचयं लिपिवद्धम् अस्ति ।

“आर्यसुवर्णाक्षी पुत्रस्य साकेतस्य भिक्षोराचार्यभदन्ताश्वघोषस्य महाकवेर्महावादिनः कृतिरियम्।”

संस्कृतसाहित्ये बौद्धकविअश्वघोषस्य योगदानम् अपरिसीम् । तस्य कृतिषु महाकाव्यं गीतिकाव्यं नाटकम् इत्यादयः सन्ति । तेषां ग्रन्थानां मध्ये अन्यतमग्रन्थं बुद्धचरितं महाकाव्यम् इति । बुद्धस्य जीवनं शिक्षाञ्चैवअस्मिन् महाकाव्यस्य विषयः ।अस्मिन् महाकाव्ये अष्टाविंशति सर्गाः सन्ति । परन्तु वर्तमानसमये सप्तदशाः सर्गाः प्राप्यते ।बुद्धस्य जीवनवृत्तान्तं बोधीसत्त्वलाभञ्चअस्मिन्काव्यस्य मुख्यविषयम् अस्ति । बुद्धस्य जन्मतः आरम्भं कृत्वा क्रमेण अन्तपुरविहारः संवेगोत्पत्तिः स्त्रीनिवारणःप्रभृतयः माध्यमेन सिद्धार्थस्य बुद्धत्तप्राप्तिपर्यन्तं संघर्षात्मकं जीवनचित्रं वहुकुशलतापूर्वकं प्रस्तुतं कृतम् ।

अश्वघोषः प्रसिद्धदार्शनिकः अस्ति । तस्य कृतीनां छत्रे छत्रे दर्शनस्य निगुढतत्त्वं दृश्यते । न केवलं बौद्धदर्शने अपितु अन्येषु दर्शनेषु अपि यथा प्राचीनसांख्ययोगदर्शने सः व्युतपत्तिं प्राप्तवान् । तस्य रचनायां दर्शनेन सह काव्यस्य संयोगःकदापि काव्यस्य माधुर्यं दार्शनिकतीक्ष्णताञ्च न बाधितवान् । तस्य विरचितस्यबुद्धचरितग्रन्थेसर्वत्र दार्शनिकतत्त्वं दृश्यते । प्रथमसर्गे शुद्धोदनः पुत्रलाभात् अनन्तरं यदा पुत्रस्य भविष्यतविषये अचिन्तयत्तदा मुनिऋषिभिः तस्मै उच्यते- पुत्रप्राप्तेः सुखं तस्य कृते क्षणमात्रम् एव भविष्यति ।

“अप्यक्षयं मे यशसो निधानं कच्चिद्ध्रुवो मे कुलहस्तसारः ।

अपि प्रयास्यामि सुखं परत्र सुप्तोऽपि पुत्रेऽनिमिषैकचक्षुः ।।

बौद्धदर्शनानुसारं दुःखं अस्ति दुःखस्य कारणानि सन्ति दुःखनिवारणस्य उपायाः सन्ति । यत् अस्मिन् काव्ये द्रष्टुं शक्यते–

“दुःखार्णवाद्व्याधिविकीर्णफेनिज्जरातङ्गान्मरणोग्रवेगात् ।उत्तारयिष्यत्ययमुह्यमानमार्तं जगजज्ञानमहाप्लवेन ।।”

जगति सर्वं दुःखम् दुःखम् । जरा दुःखं व्याधिरिदुःखं मृत्युर्दुःखं प्रियवियोगे दुःखम् अप्रियसंयोगेऽपि दुःखम् । किंवहुना यदनित्यं तद् दुःखम् ।

चतुर्थसर्गे वर्णितः जगति सर्वं दुःखम् । जरा दुःखं व्याधिरिदुःखं मृत्युर्दुःखं प्रियवियोगे दुःखम् अप्रियसंयोगेऽपि दुःखम् । किंवहुना यदनित्यं तद् दुःखम्।

“जरां व्याधिं च मृत्युं च को हि जानने सचेतनः ।

स्वस्थस्तिष्ठेन्निषीदेद्वा शयेद्वा किं पुनर्हसेत्।।”

षष्ठसर्गे अविद्यायाः सर्वदुःखमूलं परकीर्तितम् । अविद्या सर्वकर्माणाम् कर्ता अस्ति
“ जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम् ।

न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना ।।”

तपस्याः फलानि मोक्षप्राप्तिसाधनानि च सप्तमे सर्गे प्रकीर्तितानि सन्ति -

“ततो द्विजातिः स तपोविहारः शाक्यर्षभायर्षभविक्रमाय ।

क्रमेण तस्मै कथयाञ्चकार तपोविशेषास्तपसः फलं च।।”[1]

शोधस्य उद्देश्यः -

1. बुद्धचरितनहाकाव्ये बौद्धदर्शनेन अश्वघोषस्य चिन्तनं कथं प्रभावितं कृतम् इति दर्शयितुं मम शोधस्य अभिप्रायः अस्ति ।
2. बौद्धदर्शनस्य मूलमन्त्रः दुःखनिवृत्तिः, बुद्धचरितमहाकाव्ये इत्यस्य कथं प्रभावितं कृतवान् इति दर्शयितुं मम शोधस्य उद्देश्यम् अस्ति ।

3. बौद्धकालीनसामाजिकदर्शनः कथं बुद्धचरिते प्रभावविस्तारम् अकरोत् इति मम शोधकार्यस्य उद्देश्यम् ।

सम्भाव्योऽध्यायबिन्यासः -

प्रथमोऽध्यायः –बौद्धदर्शनस्य परिचयम्

a)भावनाचतुष्टयम्

b)आर्यचतुष्टयम्

c)प्रतीत्यसमुत्पादवादः

d)विज्ञानवादः

द्वितीयऽध्यायः –बुद्धचरितस्यपरिचयम्

a)अश्वघोषस्य भावनाः

b)बुद्धस्य जन्मवृतान्तम्

c) बुद्धस्य जीवनवृतान्तम्

तृतीयोऽध्यायः – काव्यदर्शनयोः सम्बन्धः

a) काव्यस्य परिचयम्

b) दर्शनस्य परिचयम्

c) काव्यदर्शनयोः सम्बन्धः

चतुर्थोऽध्यायः – बुद्धचरिते बौद्धदर्शनस्य प्रभावः

a)बुद्धचरितेभावनाचतुष्टयम्

b)बुद्धचरिते आर्यचतुष्टयम्

c)बुद्धचरिते प्रतीत्यसमुत्पादवादः

पञ्चमोऽध्यायः - a) बुद्धचरितेबौद्धकालीनसमाजस्य प्रभावः

सहायकग्रन्थसूचीः -

1. भारतीय दर्शन,(बांला) ड. समरेन्द्र भट्टाचार्यः, बुक सिण्डिकेट् प्राइभेट लिमिटेड्, कोलकाता।
2. भारतीय दर्शन,(बांला) प्रथम खण्ड, प्रमोदबन्ध्धु सेनगुप्त, व्यानार्जी पावलिशार्स।
3. बौद्ध-दर्शन,(वांला)अमित भट्टाचार्यः,संस्कृत पुस्तक भाण्डार 2001।
4. बौद्ध-दर्शन,पं. बलदेव उपाध्याय,हिन्दि हिन्दु बिश्वविद्यालय बनारस 1946।
5. बुद्धचरितम्, श्रीसुनील कुमार जाना, संस्कृत वुक डिपो 2016।
6. बुद्धचरितम्,ड. जयश्री चट्टोपाध्याय, संस्कृत पुस्तक भाण्डार 2014।
7. बुद्धचरितम् , स्वामी द्वारिकादासशास्त्री, चौखम्बा संस्कृत सीरीज अफिस, वाराणसी 2015।